# Shri Kartikeyastotrakadambam

# શ્રીકાર્તિકેયસ્તોત્રકદમ્બમ્

## Document Information

Text title : kArtikeyastotrakadambam

File name : kArtikeyastotrakadambam.itx

Category : subrahmanya, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_subrahmanya

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકાર્તિકેયસ્તોત્રકદમ્બમ્

શ્રીમયૂરાચલક્ષેત્રે - (કુન્નક્કુડ્યપરનામકે)
કાર્તિકેય કરુણામૃતરાશે કાર્તિકે યતહૃદા તવ પૂજા ।
પૂર્તયે ભવતિ વાઞ્છિતપઙ્ક્તેઃ કીર્તયે ચ રચિતા મનુજેન ॥ ૧॥

અત્યન્તપાપકર્મા મત્તુલ્યો નાસ્તિ ભૂતલે ગુહ ભો ।
પૂરયસિ યદિ મદિષ્ટં ચિત્રં લોકસ્ય જાયતે ભૂરિ ॥ ૨॥

કારાગૃહસ્થિતં યશ્ચક્રે લોકેશમપિ વિધાતારમ્ ।
તમનુલ્લઙ્ઘિતશાસનમનિશં પ્રણમામિ ષણ્મુખં મોદાત્ ॥ ૩॥

નાહં મન્ત્રજપં તે સેવાં સપર્યાં વા ।
નૈસર્ગિક્યા કૃપયા મદભીષ્ટં પૂરયાશુ તદ્ગુહ ભો ॥ ૪॥

નિખિલાનપિ મમ મન્તૂન્ સહસે નૈવાત્ર સંશયઃ કશ્ચિત્ ।
યસ્માત્સહમાનસુતસ્ત્વમસિ કૃપાવારિધે ષડાસ્ય વિભો ॥ ૫॥

યદિ મદ્વાઞ્છિતદાને શક્તિર્નાસ્તીતિ ષણ્મુખ બ્રૂષે ।
તદનૃતમેવ સ્યાત્તે વાક્યં શક્તિં દધાસિ યત્પાણૌ ॥ ૬॥

મયૂરસ્ય પત્રે પ્રલમ્બં પદાબ્જં દધાનં કકુદ્યેવ તસ્યાપરં ચ ।
સુરેન્દ્રસ્ય પુત્ર્યા ચ વલ્લ્યા ચ પાર્શ્વદ્વયં
ભાસયન્તં ષડાસ્યં ભજેઽહમ્ ॥ ૭॥

વિવેકં વિરક્તિં શમાદેશ્ચ ષટ્કં મુમુક્ષાં ચ દત્ત્વા ષડાસ્યાશુ મહ્યમ્ ।
વિચારે ચ બુદ્ધિં દૃઢાં દેહિ
વલ્લીસુરેન્દ્રાત્મજાઽઽશ્લિષ્ટવર્ષ્મન્નમસ્તે ॥ ૮॥

સુરેશાનપુત્રીપુલિન્દેશકન્યાસમાશ્લિષ્ટપાર્શ્વં કૃપાવારિરાશિમ્ ।
મયૂરાચલાગ્રે સદા વાસશીલં સદાનન્દદં નૌમિ ષડ્વક્ત્રમીશમ્ ॥ ૯॥

સ્વભક્તૈર્મહાભક્તિતઃ પક્વદેહાન્તમાનીય દૂરાત્પુરા સ્થાપિતાન્યઃ ।

ક્ષણાત્કુક્કુટાદીન્ પુનઃ પ્રાણયુક્તાન્ કરોતિ સ્મ તં ભાવયેઽહં ષડાસ્યમ્ ॥ ૧૦॥

રવજિતપરપુષ્ટરવ સ્વરધિપપુત્રીમનોઽબ્જશિશુભાનો ।
પુરતો ભવ મમ શીઘ્રં પુરહરમોદાબ્ધિપૂર્ણિમાચન્દ્ર ॥ ૧૧॥

શતમખમુખસુરપૂજિત નતમતિદાનપ્રચણ્ડપદસેવ ।
શ્રિતજનદુઃખવિભેદવ્રતધૃતકઙ્કણ નમોઽસ્તુ ગુહ તુભ્યમ્ ॥ ૧૨॥

વૃષ્ટિં પ્રયચ્છ ષણ્મુખ મય્યપિ પાપે કૃપાં વિધાયાશુ ।
સુકૃતિષુ કરુણાકરણે કા વા શ્લાઘા ભવેત્તવ ભો ॥ ૧૩॥

મહીજલાદ્યષ્ટતનોઃ પુરાણાં હરસ્ય પુત્ર પ્રણતાર્તિહારિન્ ।
પ્રપન્નતાપસ્ય નિવારણાય પ્રયચ્છ વૃષ્ટિં ગુહ ષણ્મુખાશુ ॥ ૧૪॥

પાદાબ્જનમ્રાખિલદેવતાલે સુદામસમ્ભૂષિતકમ્બુકણ્ઠ ।
સૌદામનીકોટિનિભાઙ્ગકાન્તે પ્રયચ્છ વૃષ્ટિં ગુહ ષણ્મુખાશુ ॥ ૧૫॥

શિખિસ્થિતાભ્યાં રમણીમણિભ્યાં પાર્શ્વસ્થિતાભ્યાં પરિસેવ્યમાનમ્ ।
સ્વયં શિખિસ્થં કરુણાસમુદ્રં સદા ષડાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૬॥

ભૂયાદ્ભૂત્યૈ મહત્યૈ ભવતનુજનનશ્ચૂર્ણિતક્રૌઞ્ચશૈલો
લીલાસૃષ્ટાણ્ડકોટિઃ કમલભવમુખસ્તૂયમાનાત્મકાર્તિઃ ।
વલ્લીદેવેન્દ્રપુત્રીહૃદયસરસિજપ્રાતરાદિત્યપુઞ્જઃ
કારુણ્યાપારવારાન્નિધિરગતનયામોદવારાશિચન્દ્રઃ ॥ ૧૭॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીકાર્તિકેયસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Kartikeyastotrakadambam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*